मूल्य २५ नये पैसे.

[ *All rights reserved by the publisher* ]

Printed & Published by Laxmibai Narayan Chaudhari
at the Nirnaya Sagar Press, 26-28, Kolbhat Street,
Bombay 2.

॥ श्रीगणेशाय नमः ॥

# अथ शब्दरूपावलिः प्रारभ्यते ।

[१*] रामो [७] हरिः [३५] करी [२२] [१३] भूभृद्भानुः [१८] कर्ता च [३९] चन्द्रमाः ।
[३८] तस्थिवान् [३७] [३१] भगवानात्मा दशैते **पुंसि** नायकाः ॥ १ ॥
[२] रमा [८] [४] रुचिर्नदी [१४] [२७] [१६] धेनुर्वाग्धीः [२३] सरिदनन्तरम् ।
[२६] [३०] क्षुत्प्रावृट् [२५] च शरच्चैव दशैताः **स्त्रीषु** नायिकाः ॥ २ ॥
[३] ज्ञानं [१०] दधि [४०] पयो [३२] वर्म [४१] [९] धनुर्वारि [२४] जगत्तथा ।
[१५] मधु [३४] नाम [३६] मनोहारि दशैतानि **नपुंसके** ॥ ३ ॥
[६०] स [६१] सा [६२] [५७] तद्यश्च [५८] या [५९] यच्च [६३] कः [६४] का [६५] किं [६९] [७०] त्वमहं [७१] स्वयम् ।
[७२] इयं [७३] चेदं [७४] चैष [७५] चैषा [७६] [७७] [७८] [७९] चैतच्चासावसावदः ॥ ४ ॥
[१९] पिता [२१] माता [२०] स्वसा [५१] [५२] गौर्नौः [२८] [१७] स्रग्भू [३३] राजा [१२] पतिः [५०] सखा ।
[४८] हाहा [४९] गोपाः [४६] [४७] [६] पपीर्हूहूश्चमूः [५] स्त्री [११] कति [२९] दिक् [४२] प्रधीः ॥ ५ ॥
[४३] [९] [४४] [५३] सुलूर्यवक्रीश्वानड्वान् [५६] पन्था [५४] ज्यायान् [५५] महान् [४५] स्वभूः ।
[६६] सर्वः [६७] सर्वा च [६८] सर्वं च [८०] [८१] [८२] [८३] द्वित्र्यादिश्च गणस्तथा ॥ ६ ॥

---

* एते ह्यङ्का ग्रन्थान्तर्वर्तिशब्दानामनुक्रमनिदर्शका इति ज्ञेयम् ।

## १ अकारान्तः पुंलिङ्गो राम-शब्दः ।

| एकवचनम् । | द्विवचनम् । | बहुवचनम् । | विभक्तिः । |
|---|---|---|---|
| रामः | रामौ | रामाः । | प्रथमा । |
| राम | रामौ | रामाः । | संबोधनम् । |
| रामम् | रामौ | रामान् । | द्वितीया । |
| रामेण | रामाभ्याम् | रामैः । | तृतीया । |
| रामाय | रामाभ्याम् | रामेभ्यः । | चतुर्थी । |
| रामात् | रामाभ्याम् | रामेभ्यः । | पञ्चमी । |
| रामस्य | रामयोः | रामाणाम् । | षष्ठी । |
| रामे | रामयोः | रामेषु । | सप्तमी । |

एवं देव-कृष्ण-मुकुन्दादयोऽकारान्तपुंलिङ्गाः ।

## २ आबन्तः स्त्रीलिङ्गो रमा-शब्दः ।

| | | | |
|---|---|---|---|
| रमा | रमे | रमाः । | प्रथमा । |
| रमे | रमे | रमाः । | संबोधनम् । |
| रमाम् | रमे | रमाः । | द्वितीया । |
| रमया | रमाभ्याम् | रमाभिः । | तृतीया । |
| रमायै | रमाभ्याम् | रमाभ्यः । | चतुर्थी । |
| रमायाः | रमाभ्याम् | रमाभ्यः । | पञ्चमी । |
| रमायाः | रमयोः | रमाणाम् । | षष्ठी । |
| रमायाम् | रमयोः | रमासु । | सप्तमी । |

एवं गङ्गा-लज्जा-विद्यादय आबन्ताः स्त्रीलिङ्गाः ।



## ३ अकारान्तो नपुंसकलिङ्गो ज्ञान-शब्दः ।

| | | | |
|---|---|---|---|
| ज्ञानम् | ज्ञाने | ज्ञानानि । | प्रथमा । |
| ज्ञान | ज्ञाने | ज्ञानानि । | संबोधनम् । |
| ज्ञानम् | ज्ञाने | ज्ञानानि । | द्वितीया । |

शेषं राम-शब्दवत् ज्ञेयम् । यथा—

| | | | |
|---|---|---|---|
| ज्ञानेन | ज्ञानाभ्याम् | ज्ञानैः । | तृतीया । |
| ज्ञानाय | ज्ञानाभ्याम् | ज्ञानेभ्यः । | चतुर्थी । |
| ज्ञानात् | ज्ञानाभ्याम् | ज्ञानेभ्यः । | पञ्चमी । |
| ज्ञानस्य | ज्ञानयोः | ज्ञानानाम् । | षष्ठी । |
| ज्ञाने | ज्ञानयोः | ज्ञानेषु । | सप्तमी । |

एवं गृह-रत्न-पात्रादयोऽकारान्तनपुंसकाः ।

## ४ ईकारान्तः स्त्रीलिङ्गो नदीसंज्ञको नदी-शब्दः ।

| | | | |
|---|---|---|---|
| नदी | नद्यौ | नद्यः । | प्रथमा । |
| नदि | नद्यौ | नद्यः । | संबोधनम् । |
| नदीम् | नद्यौ | नदीः । | द्वितीया । |
| नद्या | नदीभ्याम् | नदीभिः । | तृतीया । |
| नद्यै | नदीभ्याम् | नदीभ्यः । | चतुर्थी । |
| नद्याः | नदीभ्याम् | नदीभ्यः । | पञ्चमी । |
| नद्याः | नद्योः | नदीनाम् । | षष्ठी । |
| नद्याम् | नद्योः | नदीषु । | सप्तमी । |

एवं पृथ्वी-कुमारी-गौर्यादय ईकारान्तस्त्रीलिङ्गाः । लक्ष्मी-अवी-तन्त्री-स्तरी-तरी इत्येतेषां तु प्रथमैकवचनं लक्ष्मीः, अवीः, तन्त्रीः, स्तरीः, तरीः इति विसर्गान्तम् । शेषं सर्वं नदी-शब्दवत् ज्ञेयम् ।

### ५ ईकारान्तः स्त्रीलिङ्गः
### स्त्री-शब्दः ।

| | | | |
|---|---|---|---|
| स्त्री | स्त्रियौ | स्त्रियः । | प्रथमा । |
| स्त्रि | स्त्रियौ | स्त्रियः । | संबोधनम् । |
| स्त्रियम्,स्त्रीम् | स्त्रिया | स्त्रियः,स्त्रीः । | द्वितीया । |
| स्त्रिया | स्त्रीभ्याम् | स्त्रीभिः । | तृतीया । |
| स्त्रियै | स्त्रीभ्याम् | स्त्रीभ्यः । | चतुर्थी । |
| स्त्रियाः | स्त्रीभ्याम् | स्त्रीभ्यः । | पञ्चमी । |
| स्त्रियाः | स्त्रियोः | स्त्रीणाम् । | षष्ठी । |
| स्त्रियाम् | स्त्रियोः | स्त्रीषु । | सप्तमी । |

### ६ ऊकारान्तः स्त्रीलिङ्गः
### चमू-शब्दः ।

| | | | |
|---|---|---|---|
| चमूः | चम्वौ | चम्वः । | प्रथमा । |
| चमु | चम्वौ | चम्वः । | संबोधनम् । |
| चमूम् | चम्वौ | चमूः । | द्वितीया । |
| चम्वा | चमूभ्याम् | चमूभिः । | तृतीया । |
| चम्वै | चमूभ्याम् | चमूभ्यः । | चतुर्थी । |
| चम्वाः | चमूभ्याम् | चमूभ्यः । | पञ्चमी । |
| चम्वाः | चम्वोः | चमूनाम् । | षष्ठी । |
| चम्वाम् | चम्वोः | चमूषु । | सप्तमी । |



एवं वधू-श्वश्रू-कर्कन्धू इत्यादय ऊकारान्ताः स्त्रीलिङ्गाः ।

### ७ इकारान्तः पुंलिङ्गो हरि-शब्दः ।

| | | | |
|---|---|---|---|
| हरिः | हरी | हरयः । | प्रथमा । |
| हरे | हरी | हरयः । | संबोधनम् । |
| हरिम् | हरी | हरीन् । | द्वितीया । |
| हरिणा | हरिभ्याम् | हरिभिः । | तृतीया । |
| हरये | हरिभ्याम् | हरिभ्यः । | चतुर्थी । |
| हरेः | हरिभ्याम् | हरिभ्यः । | पञ्चमी । |
| हरेः | हर्योः | हरीणाम् । | षष्ठी । |
| हरौ | हर्योः | हरिषु । | सप्तमी । |

एवं भूपति-रवि-यति-अतिसखि-इत्यादय इकारान्ताः पुंलिङ्गाः ।

### ८ इकारान्तः स्त्रीलिङ्गो रुचि-शब्दः ।

| | | | |
|---|---|---|---|
| रुचिः | रुची | रुचयः । | प्र० । |
| रुचे | रुची | रुचयः । | सं० । |
| रुचिम् | रुची | रुचीः । | द्वि० । |
| रुच्या | रुचिभ्याम् | रुचिभिः । | तृ० । |
| रुच्यै, रुचये | रुचिभ्याम् | रुचिभ्यः । | च० । |

| | | | |
|---|---|---|---|
| रुच्याः, रुचेः | रुचिभ्याम् | रुचिभ्यः । | प० । |
| रुच्याः, रुचेः | रुच्योः | रुचीनाम् । | ष० । |
| रुच्याम्, रुचौ | रुच्योः | रुचिषु । | स० । |

एवं स्तुति-मति-बुद्धि इत्यादय इकारान्ताः स्त्रीलिङ्गाः ।

## ९ इकारान्तो नपुंसकलिङ्गो वारि-शब्दः ।

| | | | |
|---|---|---|---|
| वारि | वारिणी | वारीणि । | प्र० । |
| वारे, वारि | वारिणी | वारीणि । | सं० । |
| वारि | वारिणी | वारीणि । | द्वि० । |
| वारिणा | वारिभ्याम् | वारिभिः । | तृ० । |
| वारिणे | वारिभ्याम् | वारिभ्यः । | च० । |
| वारिणः | वारिभ्याम् | वारिभ्यः । | प० । |
| वारिणः | वारिणोः | वारीणाम् । | ष० । |
| वारिणि | वारिणोः | वारिषु । | स० । |

एवं इकारान्ता नपुंसकलिङ्गाः ।

## १० इकारान्तो नपुंसकलिङ्गो दधि-शब्दः ।

| | | | |
|---|---|---|---|
| दधि | दधिनी | दधीनि । | प्रथमा । |
| दधे, दधि | दधिनी | दधीनि । | संबोधनम् । |
| दधि | दधिनी | दधीनि । | द्वितीया । |
| दध्ना | दधिभ्याम् | दधिभिः । | तृतीया । |
| दध्ने | दधिभ्याम् | दधिभ्यः । | चतुर्थी । |
| दध्नः | दधिभ्याम् | दधिभ्यः । | पञ्चमी । |



| | | | |
|---|---|---|---|
| दध्नः | दध्नोः | दध्नाम् । | षष्ठी । |
| दध्नि, दधनि | दध्नोः | दधिषु । | सप्तमी । |

एवं अस्थि-सक्थि-अक्षि-शब्दाः ।

## ११ त्रिषु लिङ्गेषु समः कति-शब्दो नित्यं बहुवचनान्तः ।

| | |
|---|---|
| कति । | प्र० । सं० । द्वि० । |
| कतिभिः । | तृ० । |
| कतिभ्यः । | च० । प० । |
| कतीनाम् । | ष० । |
| कतिषु । | स० । |

## १२ इकारान्तः पुंलिङ्गः पति-शब्दः ।

| | | | |
|---|---|---|---|
| पतिः | पती | पतयः । | प्रथमा । |
| पते | पती | पतयः । | संबोधनम् । |
| पतिम् | पती | पतीन् । | द्वितीया । |
| पत्या | पतिभ्याम् | पतिभिः । | तृतीया । |
| पत्ये | पतिभ्याम् | पतिभ्यः । | चतुर्थी । |
| पत्युः | पतिभ्याम् | पतिभ्यः । | पञ्चमी । |
| पत्युः | पत्योः | पतीनाम् । | षष्ठी । |
| पत्यौ | पत्योः | पतिषु । | सप्तमी । |

## १३ उकारान्तः पुंलिङ्गो भानु-शब्दः ।

| | | | |
|---|---|---|---|
| भानुः | भानू | भानवः । | प्रथमा । |
| भानो | भानू | भानवः । | संबोधनम् । |
| भानुम् | भानू | भानून् । | द्वितीया । |
| भानुना | भानुभ्याम् | भानुभिः । | तृतीया । |
| भानवे | भानुभ्याम् | भानुभ्यः । | चतुर्थी । |
| भानोः | भानुभ्याम् | भानुभ्यः । | पञ्चमी । |
| भानोः | भान्वोः | भानूनाम् । | षष्ठी । |
| भानौ | भान्वोः | भानुषु । | सप्तमी । |

एवं शंभु-विष्णु-सूनु इत्यादय उकारान्ताः पुंलिङ्गाः ।

## १४ उकारान्तः स्त्रीलिङ्गो धेनु-शब्दः ।

| | | | |
|---|---|---|---|
| धेनुः | धेनू | धेनवः । | प्रथमा । |
| धेनो | धेनू | धेनवः । | संबोधनम् । |
| धेनुम् | धेनू | धेनूः । | द्वितीया । |
| धेन्वा | धेनुभ्याम् | धेनुभिः । | तृतीया । |
| धेन्वै, धेनवे | धेनुभ्याम् | धेनुभ्यः । | चतुर्थी । |
| धेन्वाः, धेनोः | धेनुभ्याम् | धेनुभ्यः । | पञ्चमी । |
| धेन्वाः, धेनोः | धेन्वोः | धेनूनाम् । | षष्ठी । |
| धेन्वाम्, धेनौ | धेन्वोः | धेनुषु । | सप्तमी । |



## १५ उकारान्तो नपुंसको मधु-शब्दः ।

| | | | |
|---|---|---|---|
| मधु | मधुनी | मधूनि । | प्रथमा । |
| मधो, मधु | मधुनी | मधूनि । | संबोधनम् । |
| मधु | मधुनी | मधूनि । | द्वितीया । |
| मधुना | मधुभ्याम् | मधुभिः । | तृतीया । |
| मधुने | मधुभ्याम् | मधुभ्यः । | चतुर्थी । |
| मधुनः | मधुभ्याम् | मधुभ्यः । | पञ्चमी । |
| मधुनः | मधुनोः | मधूनाम् । | षष्ठी । |
| मधुनि | मधुनोः | मधुषु । | सप्तमी । |

एवं वस्तु-जतु-अश्रु इत्यादय उकारान्ता नपुंसकशब्दाः ।

## १६ ईकारान्तः स्त्रीलिङ्गो धी-शब्दः ।

### ( धातुरूपः )

| | | | |
|---|---|---|---|
| धीः | धियौ | धियः । | प्र० । सं० । |
| धियम् | धियौ | धियः । | द्वितीया । |
| धिया | धीभ्याम् | धीभिः । | तृतीया । |
| धियै, धिये | धीभ्याम् | धीभ्यः । | चतुर्थी । |
| धियाः, धियः | धीभ्याम् | धीभ्यः । | पञ्चमी । |
| धियाः, धियः | धियोः | धीनाम्, धियाम् । | षष्ठी । |
| धियाम्, धियि | धियोः | धीषु । | सप्तमी । |

एवं ह्री-श्री-भी-वृश्चिकभी-इत्यादय ईकारान्ताः स्त्रीलिङ्गाः ।

## १७ ऊकारान्तः स्त्रीलिङ्गो भू-शब्दः ।
## (धातुरूपः)

| | | | |
|---|---|---|---|
| भूः | भुवौ | भुवः । | प्रथमा । सं० । |
| भुवम् | भुवौ | भुवः । | द्वितीया । |
| भुवा | भूभ्याम् | भूभिः । | तृतीया । |
| भुवै, भुवे | भूभ्याम् | भूभ्यः । | चतुर्थी । |
| भुवाः, भुवः | भूभ्याम् | भूभ्यः । | पञ्चमी । |
| भुवाः, भुवः | भुवोः | भूनाम्, भुवाम् । | षष्ठी । |
| भुवाम्, भुवि | भुवोः | भूषु । | सप्तमी । |

एवं सू-जू-भ्रू-सुभ्रू इत्यादय ऊकारान्ताः स्त्रीलिङ्गाः ।

## १८ ऋकारान्तः पुंलिङ्गः कर्तृ-शब्दः ।

| | | | |
|---|---|---|---|
| कर्ता | कर्तारौ | कर्तारः । | प्रथमा । |
| कर्तः | कर्तारौ | कर्तारः । | संबोधनम् । |
| कर्तारम् | कर्तारौ | कर्तॄन् । | द्वितीया । |
| कर्त्रा | कर्तृभ्याम् | कर्तृभिः । | तृतीया । |
| कर्त्रे | कर्तृभ्याम् | कर्तृभ्यः । | चतुर्थी । |
| कर्तुः | कर्तृभ्याम् | कर्तृभ्यः । | पञ्चमी । |
| कर्तुः | कर्त्रोः | कर्तॄणाम् । | षष्ठी । |
| कर्तरि | कर्त्रोः | कर्तृषु । | सप्तमी । |

एवं धातृ-नेतृ-नप्तृ-शास्तृ इत्यादय ऋकारान्ताः पुंलिङ्गाः ।



## १९ ऋकारान्तः पुंलिङ्गः पितृ-शब्दः ।

| | | | |
|---|---|---|---|
| पिता | पितरौ | पितरः । | प्रथमा । |
| पितः | पितरौ | पितरः । | संबोधनम् । |
| पितरम् | पितरौ | पितॄन् । | द्वितीया । |

पित्रा पितृभ्याम् इत्यादि । अग्रे कर्तृवज्ज्ञेयम् ।

एवं भ्रातृ-जामातृ-देवृ-शंस्तृ-सव्येष्ठृ-नृ इति षट् शब्दाः । नृ-शब्दस्य षष्ठीबहुवचने तु नृणाम् नॄणाम्, इति रूप-द्वयम् । शेषं पितृ-शब्दवत् ज्ञेयम् ।

## २० ऋकारान्तः स्त्रीलिङ्गः स्वसृ-शब्दः ।

| | | | |
|---|---|---|---|
| स्वसा | स्वसारौ | स्वसारः । | प्रथमा । |
| स्वसः | स्वसारौ | स्वसारः । | संबोधनम् । |
| स्वसारम् | स्वसारौ | स्वसॄः । | द्वितीया । |

स्वस्रा स्वसृभ्याम् इत्यादि । शेषं कर्तृ-शब्दवज्ज्ञेयम् ।

## २१ ऋकारान्तः स्त्रीलिङ्गो मातृ-शब्दः ।

| | | | |
|---|---|---|---|
| माता | मातरौ | मातरः । | प्रथमा । |
| मातः | मातरौ | मातरः । | संबोधनम् । |
| मातरम् | मातरौ | मातॄः । | द्वितीया । |

मात्रा मातृभ्याम् इत्यादि । शेषं कर्तृवत् ज्ञेयम् ।
एवं यातृ-दुहितृ-ननान्दृ-ननन्दृ-इति चत्वारः शब्दाः ।

## २२ तकारान्तः पुंलिङ्गो भूभृत्-शब्दः ।

| | | | |
|---|---|---|---|
| भूभृत् | भूभृतौ | भूभृतः । | प्र० । सं० । |
| भूभृतम् | भूभृतौ | भूभृतः । | द्वितीया । |
| भूभृता | भूभृद्भ्याम् | भूभृद्भिः । | तृतीया । |
| भूभृते | भूभृद्भ्याम् | भूभृद्भ्यः । | चतुर्थी । |
| भूभृतः | भूभृद्भ्याम् | भूभृद्भ्यः । | पञ्चमी । |
| भूभृतः | भूभृतोः | भूभृताम् । | षष्ठी । |
| भूभृति | भूभृतोः | भूभृत्सु । | सप्तमी । |

एवं मरुत्-हरित् इत्यादयः ।

## २३ एवं तकारान्तः स्त्रीलिङ्गः सरित्-शब्दः ।

| | | | |
|---|---|---|---|
| सरित् | सरितौ | सरितः । | इ० । |

## २४ तकारान्तो नपुंसकलिङ्गो जगत्-शब्दः ।

| | | | |
|---|---|---|---|
| जगत् | जगती | जगन्ति । प्र० । सं० । द्वि० । | |
| जगता | जगद्भ्याम् | जगद्भिः इत्यादि । | |

अग्रे भूभृत्शब्दवत् ज्ञेयम् ।

## २५ दकारान्तः स्त्रीलिङ्गः शरद्-शब्दः ।

| | | | |
|---|---|---|---|
| शरद् | शरदौ | शरदः । | प्र० सं० । |
| शरदम् | शरदौ | शरदः । | द्वितीया । |
| शरदा | शरद्भ्याम् | शरद्भिः । | तृतीया । |
| शरदे | शरद्भ्याम् | शरद्भ्यः । | चतुर्थी । |
| शरदः | शरद्भ्याम् | शरद्भ्यः । | पञ्चमी । |



| | | | |
|---|---|---|---|
| शरदः | शरदोः | शरदाम् । | षष्ठी । |
| शरदि | शरदोः | शरत्सु । | सप्तमी । |

एवं दकारान्तः पुंलिङ्गस्-तमोनुद्-शब्दः ।

## २६ धकारान्तः स्त्रीलिङ्गः क्षुध्-शब्दः ।

| | | | |
|---|---|---|---|
| क्षुत् | क्षुधौ | क्षुधः । | प्र० । सं० । |
| क्षुधम् | क्षुधौ | क्षुधः । | द्वितीया । |
| क्षुधा | क्षुद्भ्याम् | क्षुद्भिः । | तृतीया । |
| क्षुधे | क्षुद्भ्याम् | क्षुद्भ्यः । | चतुर्थी । |
| क्षुधः | क्षुद्भ्याम् | क्षुद्भ्यः । | पञ्चमी । |
| क्षुधः | क्षुधोः | क्षुधाम् । | षष्ठी । |
| क्षुधि | क्षुधोः | क्षुत्सु । | सप्तमी । |

एवं समिध्-युयुध्-शब्दौ ।

## २७ चकारान्तः स्त्रीलिङ्गो वाच्-शब्दः ।

| | | | |
|---|---|---|---|
| वाक् | वाचौ | वाचः । | प्र० । सं० । |
| वाचम् | वाचौ | वाचः । | द्वितीया । |
| वाचा | वाग्भ्याम् | वाग्भिः । | तृतीया । |
| वाचे | वाग्भ्याम् | वाग्भ्यः । | चतुर्थी । |
| वाचः | वाग्भ्याम् | वाग्भ्यः । | पञ्चमी । |
| वाचः | वाचोः | वाचाम् । | षष्ठी । |
| वाचि | वाचोः | वाक्षु । | सप्तमी । |

एवं शुच्-पयोमुच् इत्यादयः ।

## २८ जकारान्तः स्त्रीलिङ्गः स्रज्-शब्दः।

| | | | |
|---|---|---|---|
| स्रक् | स्रजौ | स्रजः। | प्र० । सं० । |
| स्रजम् | स्रजौ | स्रजः। | द्वितीया । |
| स्रजा | स्रग्भ्याम् | स्रग्भिः। | तृतीया । |
| स्रजे | स्रग्भ्याम् | स्रग्भ्यः। | चतुर्थी । |
| स्रजः | स्रग्भ्याम् | स्रग्भ्यः। | पञ्चमी । |
| स्रजः | स्रजोः | स्रजाम्। | षष्ठी । |
| स्रजि | स्रजोः | स्रक्षु। | सप्तमी । |

एवं ऋत्विज्-सुयुज् इत्यादयः।

## २९ शकारान्तः स्त्रीलिङ्गो दिश्-शब्दः।

| | | | |
|---|---|---|---|
| दिक् | दिशौ | दिशः। | प्र० । सं० |
| दिशम् | दिशौ | दिशः। | द्वितीया । |
| दिशा | दिग्भ्याम् | दिग्भिः। | तृतीया । |
| दिशे | दिग्भ्याम् | दिग्भ्यः। | चतुर्थी । |
| दिशः | दिग्भ्याम् | दिग्भ्यः। | पञ्चमी । |
| दिशः | दिशोः | दिशाम्। | षष्ठी । |
| दिशि | दिशोः | दिक्षु। | सप्तमी । |

एवं दृश्-घृतस्पृश्-तादृश् इत्यादयः।



## ३० षकारान्तः स्त्रीलिङ्गः प्रावृष्-शब्दः।

| | | | |
|---|---|---|---|
| प्रावृट् | प्रावृषौ | प्रावृषः। | प्र० । सं० । |
| प्रावृषम् | प्रावृषौ | प्रावृषः। | द्वितीया । |
| प्रावृषा | प्रावृड्भ्याम् | प्रावृड्भिः। | तृतीया । |
| प्रावृषे | प्रावृड्भ्याम् | प्रावृड्भ्यः। | चतुर्थी । |
| प्रावृषः | प्रावृड्भ्याम् | प्रावृड्भ्यः। | पञ्चमी । |
| प्रावृषः | प्रावृषोः | प्रावृषाम्। | षष्ठी । |
| प्रावृषि | प्रावृषोः | प्रावृट्सु। | सप्तमी । |

एवं त्विष्-द्विष्-रत्नमुष् इत्यादयः।

## ३१ नान्तः पुंलिङ्ग आत्मन्-शब्दः।

| | | | |
|---|---|---|---|
| आत्मा | आत्मानौ | आत्मानः। | प्रथमा । |
| आत्मन् | आत्मानौ | आत्मानः। | संबोधनम् । |
| आत्मानम् | आत्मानौ | आत्मनः। | द्वितीया । |
| आत्मना | आत्मभ्याम् | आत्मभिः। | तृतीया । |
| आत्मने | आत्मभ्याम् | आत्मभ्यः। | चतुर्थी । |
| आत्मनः | आत्मभ्याम् | आत्मभ्यः। | पञ्चमी । |
| आत्मनः | आत्मनोः | आत्मनाम्। | षष्ठी । |
| आत्मनि | आत्मनोः | आत्मसु। | सप्तमी । |

एवं ब्रह्मन्-यज्वन्-सुशर्मन्-कृष्णवर्मन् इत्यादयः।

### ३२ नान्तो नपुंसको वर्मन्-शब्दः ।

| | | | |
|---|---|---|---|
| वर्म | वर्मणी | वर्माणि । | प्र० । द्वि० । |
| वर्मन्, वर्म | वर्मणी | वर्माणि । | संबोधनम् । |
| वर्मणा | वर्मभ्याम् | इत्यादि । | |

शेषं 'आत्मन्'-शब्दवज्ज्ञेयम् । एवं ब्रह्मन्-शर्मन्-कर्मन् इत्यादयः ।

### ३३ नान्तः पुंलिङ्गो राजन्-शब्दः ।

| | | | |
|---|---|---|---|
| राजा | राजानौ | राजानः । | प्रथमा । |
| राजन् | राजानौ | राजानः । | संबोधनम् । |
| राजानम् | राजानौ | राज्ञः । | द्वितीया । |
| राज्ञा | राजभ्याम् | राजभिः । | तृतीया । |
| राज्ञे | राजभ्याम् | राजभ्यः । | चतुर्थी । |
| राज्ञः | राजभ्याम् | राजभ्यः । | पञ्चमी । |
| राज्ञः | राज्ञोः | राज्ञाम् । | षष्ठी । |
| राज्ञि, राजनि | राज्ञोः | राजसु । | सप्तमी । |

एवं महिमन्-गरिमन्-सुनामन् इत्यादयः ।

### ३४ नकारान्तो नपुंसको नामन्-शब्दः ।

| | | | |
|---|---|---|---|
| नाम | नामनी, नाम्नी | नामानि । | प्र० । द्वि० । |
| नाम, नामन् | नामनी, नाम्नी | नामानि । | संबोधनम् । |
| नाम्ना | नामभ्याम् | नामभिः | इत्यादि । |

शेषं 'राजन्'-शब्दवज्ज्ञेयम् ।
एवं लोमन्-व्योमन्-प्रेमन् इत्यादयः ।



### ३५ इन्नन्तः पुंलिङ्गः करिन्-शब्दः ।

| | | | |
|---|---|---|---|
| करी | करिणौ | करिणः । | प्रथमा । |
| करिन् | करिणौ | करिणः । | संबोधनम् । |
| करिणम् | करिणौ | करिणः । | द्वितीया । |
| करिणा | करिभ्याम् | करिभिः । | तृतीया । |
| करिणे | करिभ्याम् | करिभ्यः । | चतुर्थी । |
| करिणः | करिभ्याम् | करिभ्यः । | पञ्चमी । |
| करिणः | करिणोः | करिणाम् । | षष्ठी । |
| करिणि | करिणोः | करिषु । | सप्तमी । |

एवं हस्तिन्-दण्डिन्-शृङ्गिन् इत्यादयः ।

### ३६ इन्नन्तो नपुंसको मनोहारिन्-शब्दः ।

| | | | |
|---|---|---|---|
| मनोहारि | मनोहारिणी | मनोहारीणि । | प्र० । द्वि० । |
| मनोहारिन्, मनोहारि | मनोहारिणी | मनोहारीणि । | संबोधनम् । |
| मनोहारिणा | मनोहारिभ्याम् | मनोहारिभिः | इत्यादि । |

शेषं करिन्शब्दवत् ज्ञेयम् ।

### ३७ वत्त्वन्तः पुंलिङ्गो भगवत्-शब्दः ।

| | | | |
|---|---|---|---|
| भगवान् | भगवन्तौ | भगवन्तः । | प्रथमा । |
| भगवन् | भगवन्तौ | भगवन्तः । | संबो० । |
| भगवन्तम् | भगवन्तौ | भगवतः । | द्वितीया । |
| भगवता | भगवद्भ्याम् | भगवद्भिः । | तृतीया । |

| | | | |
|---|---|---|---|
| भगवते | भगवद्भ्याम् | भगवद्भ्यः । | चतुर्थी । |
| भगवतः | भगवद्भ्याम् | भगवद्भ्यः । | पञ्चमी । |
| भगवतः | भगवतोः | भगवताम् । | षष्ठी । |
| भगवति | भगवतोः | भगवत्सु । | सप्तमी । |

एवं भवत्-बुद्धिमत-श्रुतिमत् इत्यादयः ।

## ३८ वस्वन्तः पुंलिङ्गस्-तस्थिवस्-शब्दः ।

| | | | |
|---|---|---|---|
| तस्थिवान् | तस्थिवांसौ | तस्थिवांसः । | प्रथमा । |
| तस्थिवन् | तस्थिवांसौ | तस्थिवांसः । | संबोधनम् । |
| तस्थिवांसम् | तस्थिवांसौ | तस्थुषः । | द्वितीया । |
| तस्थुषा | तस्थिवद्भ्याम् | तस्थिवद्भिः । | तृतीया । |
| तस्थुषे | तस्थिवद्भ्याम् | तस्थिवद्भ्यः । | चतुर्थी । |
| तस्थुषः | तस्थिवद्भ्याम् | तस्थिवद्भ्यः । | पञ्चमी । |
| तस्थुषः | तस्थुषोः | तस्थुषाम् । | षष्ठी । |
| तस्थुषि | तस्थुषोः | तस्थिवत्सु । | सप्तमी । |

एवं दवीयस्-सेदिवस्-जग्मिवस् इत्यादयः ।

## ३९ सान्तः पुंलिङ्गस्-चन्द्रमस्-शब्दः ।

| | | | |
|---|---|---|---|
| चन्द्रमाः | चन्द्रमसौ | चन्द्रमसः । | प्रथमा । |
| चन्द्रमः | चन्द्रमसौ | चन्द्रमसः । | संबोधनम् । |
| चन्द्रमसम् | चन्द्रमसौ | चन्द्रमसः । | द्वितीया । |
| चन्द्रमसा | चन्द्रमोभ्याम् | चन्द्रमोभिः । | तृतीया । |
| चन्द्रमसे | चन्द्रमोभ्याम् | चन्द्रमोभ्यः । | चतुर्थी । |



| | | | |
|---|---|---|---|
| चन्द्रमसः | चन्द्रमोभ्याम् | चन्द्रमोभ्यः । | पञ्चमी । |
| चन्द्रमसः | चन्द्रमसोः | चन्द्रमसाम् । | षष्ठी । |
| चन्द्रमसि | चन्द्रमसोः | चन्द्रमस्सु । | सप्तमी |

एवं वेधस्-सुमनस्-दुर्मनस् इत्यादयः ।

## ४० सान्तो नपुंसकः पयस्-शब्दः ।

| | | | |
|---|---|---|---|
| पयः | पयसी | पयांसि । | प्र० । सं० । द्वि० । |
| पयसा | पयोभ्याम् | पयोभिः । | |

इत्यादि । शेषं चन्द्रमस्–शब्दवत् ज्ञेयम् । एवं मनस्-वयस्-वचस्-रजस् इत्यादयः ।

## ४१ सान्तो नपुंसको धनुस्-शब्दः ।

| | | | |
|---|---|---|---|
| धनुः | धनुषी | धनूंषि । | प्र० । सं० । द्वि० |
| धनुषा | धनुर्भ्याम् | धनुर्भिः । | तृतीया । |
| धनुषे | धनुर्भ्याम् | धनुर्भ्यः । | चतुर्थी । |
| धनुषः | धनुर्भ्याम् | धनुर्भ्यः । | पञ्चमी । |
| धनुषः | धनुषोः | धनुषाम् । | षष्ठी । |
| धनुषि | धनुषोः | धनुष्षु । | सप्तमी । |

एवं हविस्-अर्चिस्-आयुस् इत्यादयः ।

## ४२ ईकारान्तः पुंलिङ्गः प्रधी-शब्दो धात्वन्तः ।

| | | | |
|---|---|---|---|
| प्रधीः | प्रध्यौ | प्रध्यः । | प्र० । सं० । |
| प्रध्यम् | प्रध्यौ | प्रध्यः । | द्वितीया । |
| प्रध्या | प्रधीभ्याम् | प्रधीभिः । | तृतीया । |

| | | | |
|---|---|---|---|
| प्रध्ये | प्रधीभ्याम् | प्रधीभ्यः । | चतुर्थी । |
| प्रध्यः | प्रधीभ्याम् | प्रधीभ्यः । | पञ्चमी । |
| प्रध्यः | प्रध्योः | प्रध्याम् । | षष्ठी । |
| प्रध्यि | प्रध्योः | प्रधीषु । | सप्तमी । |

एवं वेवी-जलपी-ग्रामणी-सेनानी इत्यादयः ।

ग्रामणी-सेनान्योः सप्तम्येकवचनं तु ग्रामण्याम्, सेनान्याम् इति षष्ठीबहुवचनवद्भवति ।

**४३ ऊकारान्तः पुंलिङ्गः सुलू-शब्दो धात्वन्तः ।**

| | | | |
|---|---|---|---|
| सुलूः | सुल्वौ | सुल्वः । | प्र० । सं० । |
| सुल्वम् | सुल्वौ | सुल्वः । | द्वितीया । |
| सुल्वा | सुलूभ्याम् | सुलूभिः । | तृतीया । |
| सुल्वे | सुलूभ्याम् | सुलूभ्यः । | चतुर्थी । |
| सुल्वः | सुलूभ्याम् | सुलूभ्यः । | पञ्चमी । |
| सुल्वः | सुल्वोः | सुल्वाम् । | षष्ठी । |
| सुल्वि | सुल्वोः | सुलूषु । | सप्तमी । |

एवं खलपू-दन्भू-करभू-कारभू इत्यादयः ।

**४४ यवक्री-शब्दस्य प्रायेण प्रधीवद्रूपाणि । तथापि तत्र**

यवक्रीः यवक्रियौ यवक्रियः इति यस्थाने इय् एव भवति इति भेदः । एवं सुश्री-परमधी-सुधी इत्यादयः ।



**४५ स्वभू-शब्दस्य प्रायेण सुलूवद्रूपाणि । तथापि तत्र**

स्वभूः स्वभुवौ स्वभुवः । इति वस्थाने उव् एव भवति इति भेदः । एवं स्वयंभू-परमलू-कटप्रू इत्यादयः ।

**४६ ईप्रत्ययान्तः पुंलिङ्गः पपी-शब्दः ।**

| | | | |
|---|---|---|---|
| पपीः | पप्यौ | पप्यः । | प्र० । सं० । |
| पपीम् | पप्यौ | पपीन् । | द्वितीया । |
| पपि | पप्योः | पपीषु । | सप्तमी । |

शेषं प्रधीवज्ज्ञेयम् । एवं ययी-वातप्रमी इत्यादयः । वातप्रमी-शब्दः प्रधी-शब्दवदपि भवति ।

**४७ ऊकारान्तः पुंलिङ्गो हूहू-शब्दः ।**

| | | | |
|---|---|---|---|
| हूहूः | हूह्वौ | हूह्वः । | प्र० । सं० । |
| हूहूम् | हूह्वौ | हूहून् । | द्वितीया । |

शेषं सर्वं सुलू-शब्दवत् ज्ञेयम् । एवं दन्भू-नृतू इ० ।

**४८ आकारान्तः पुंलिङ्गो हाहा-शब्दः ।**

| | | | |
|---|---|---|---|
| हाहाः | हाहौ | हाहाः । | प्र० । सं० । |
| हाहाम् | हाहौ | हाहान् । | द्वितीया । |
| हाहा | हाहाभ्याम् | हाहाभिः । | तृतीया । |
| हाहै | हाहाभ्याम् | हाहाभ्यः । | चतुर्थी । |
| हाहाः | हाहाभ्याम् | हाहाभ्यः । | पञ्चमी । |

| | | | |
|---|---|---|---|
| हाहाः | हाहौः | हाहाम् । | षष्ठी । |
| हाहे | हाहौः | हाहासु । | सप्तमी । |

## ४९ आकारान्त उभयलिङ्गो गोपा-शब्दः ।
## ( धात्वन्तः । )

| | | | |
|---|---|---|---|
| गोपाः | गोपौ | गोपाः । | प्र० । सं० । |
| गोपाम् | गोपौ | गोपः । | द्वितीया । |
| गोपा | गोपाभ्याम् | गोपाभिः । | तृतीया । |
| गोपे | गोपाभ्याम् | गोपाभ्यः । | चतुर्थी । |
| गोपः | गोपाभ्याम् | गोपाभ्यः । | पञ्चमी । |
| गोपः | गोपोः | गोपाम् । | षष्ठी । |
| गोपि | गोपोः | गोपासु । | सप्तमी । |

एवं विश्वपा-सोमपा-शङ्खध्मा इत्यादयः ।

## ५० इकारान्तः पुंलिङ्गः सखि-शब्दः ।

| | | | |
|---|---|---|---|
| सखा | सखायौ | सखायः । | प्रथमा । |
| सखे | सखायौ | सखायः । | संबोधनम् । |
| सखायम् | सखायौ | सखीन् । | द्वितीया । |
| सख्या | सखिभ्याम् | सखिभिः । | इत्यादि । |

अग्रे पति-शब्दवत् ज्ञेयम् ।

## ५१ ओकारान्त उभयलिङ्गो गो-शब्दः ।

| | | | |
|---|---|---|---|
| गौः | गावौ | गावः । | प्र० । सं० । |
| गाम् | गावौ | गाः । | द्वितीया । |
| गवा | गोभ्याम् | गोभिः । | तृतीया । |
| गवे | गोभ्याम् | गोभ्यः । | चतुर्थी । |
| गोः | गोभ्याम् | गोभ्यः । | पञ्चमी । |
| गोः | गवोः | गवाम् । | षष्ठी । |
| गवि | गवोः | गोषु । | सप्तमी । |



एवं ओकारान्तः स्त्रीलिङ्गो द्यो-शब्दः ।

## ५२ औकारान्तः स्त्रीलिङ्गो नौ-शब्दः ।

| | | | |
|---|---|---|---|
| नौः | नावौ | नावः । | प्र० । सं० । |
| नावम् | नावौ | नावः । | द्वितीया । |
| नावा | नौभ्याम् | नौभिः । | तृतीया । |
| नावे | नौभ्याम् | नौभ्यः । | चतुर्थी । |
| नावः | नौभ्याम् | नौभ्यः । | पञ्चमी । |
| नावः | नावोः | नावाम् । | षष्ठी । |
| नावि | नावोः | नौषु । | सप्तमी । |

एवं ग्लौः ।

## ५३ हकारान्तः पुंलिङ्गः अनडुह्-शब्दः ।

| | | | |
|---|---|---|---|
| अनड्वान् | अनड्वाहौ | अनड्वाहः । | प्रथमा । |
| अनड्वन् | अनड्वाहौ | अनड्वाहः । | संबोधनम् । |
| अनड्वाहम् | अनड्वाहौ | अनडुहः । | द्वितीया । |
| अनडुहा | अनडुद्भ्याम् | अनडुद्भिः । | इत्यादि । |

शेषं क्षुध्-शब्दवत् ज्ञेयम् ।

## ५४ सान्तः पुंलिङ्गो ज्यायस्-शब्दः ।

| | | | |
|---|---|---|---|
| ज्यायान् | ज्यायांसौ | ज्यायांसः । | प्रथमा । |
| ज्यायन् | ज्यायांसौ | ज्यायांसः । | संबोधनम् । |
| ज्यायांसम् | ज्यायांसौ | ज्यायसः । | द्वितीया । |
| ज्यायसा | ज्यायोभ्याम् | ज्यायोभिः | इत्यादि । शेषं |

चन्द्रमस्–शब्दवत् ज्ञेयम् । एवं प्रेयस्–कनीयस् इ० ।

## ५५ तकारान्तः पुंलिङ्गो महत्-शब्दः ।

| | | | |
|---|---|---|---|
| महान् | महान्तौ | महान्तः । | प्रथमा । |
| महन् | महान्तौ | महान्तः । | संबोधनम् । |
| महान्तम् | महान्तौ | महतः । | द्वितीया । |
| महता | महद्भ्याम् | महद्भिः | इत्यादि । |

शेषं भूभृत्-शब्दवत् ज्ञेयम् ।

## ५६ इन्नन्तः पुंलिङ्गः पथिन्-शब्दः ।

| | | | |
|---|---|---|---|
| पन्थाः | पन्थानौ | पन्थानः । | प्र० । सं० । |
| पन्थानम् | पन्थानौ | पथः । | द्वितीया । |
| पथा | पथिभ्याम् | पथिभिः । | तृतीया । |
| पथे | पथिभ्याम् | पथिभ्यः । | चतुर्थी । |
| पथः | पथिभ्याम् | पथिभ्यः । | पञ्चमी । |
| पथः | पथोः | पथाम् । | षष्ठी । |
| पथि | पथोः | पथिषु । | सप्तमी । |



## दकारान्तः सर्वनामसंज्ञको यद्-शब्दः ।

### ५७ ( पुंसि )

| | | | |
|---|---|---|---|
| यः | यौ | ये । | प्रथमा । |
| यम् | यौ | यान् । | द्वितीया । |
| येन | याभ्याम् | यैः । | तृतीया । |
| यस्मै | याभ्याम् | येभ्यः । | चतुर्थी । |
| यस्मात् | याभ्याम् | येभ्यः । | पञ्चमी । |
| यस्य | ययोः | येषाम् । | षष्ठी । |
| यस्मिन् | ययोः | येषु । | सप्तमी । |

### ५८ ( स्त्रियाम् )

| | | | |
|---|---|---|---|
| या | ये | याः । | प्रथमा । |
| याम् | ये | याः । | द्वितीया । |
| यया | याभ्याम् | याभिः । | तृतीया । |
| यस्यै | याभ्याम् | याभ्यः । | चतुर्थी । |
| यस्याः | याभ्याम् | याभ्यः । | पञ्चमी । |
| यस्याः | ययोः | यासाम् । | षष्ठी । |
| यस्याम् | ययोः | यासु । | सप्तमी । |

### ५९ ( नपुंसके )

| | | | |
|---|---|---|---|
| यत् | ये | यानि । | प्रथमा । |
| यत् | ये | यानि । | द्वितीया । |

| | | | |
|---|---|---|---|
| येन | याभ्याम् | यैः। | इत्यादि। |

शेषं पुंवज्ज्ञेयम्। सर्वनाम्नां प्रायेण संबोधनं नास्ति।

**दकारान्तः सर्वनामसंज्ञकस्-तद्-शब्दः।**

**६० (पुंसि)**

| | | | |
|---|---|---|---|
| सः | तौ | ते। | प्रथमा। |
| तम् | तौ | तान्। | इत्यादि। |

शेषं यच्छब्दवज्ज्ञेयम्।

**६१ (स्त्रियाम्)**

| | | | |
|---|---|---|---|
| सा | ते | ताः। | प्रथमा। |
| ताम् | ते | ताः। | इत्यादि। |

शेषं स्त्रीलिङ्ग-यच्छब्दवत् ज्ञेयम्।

**६२ (नपुंसके)**

| | | | |
|---|---|---|---|
| तत् | ते | तानि। | इत्यादि। |

शेषं नपुंसक-यच्छब्दवत् ज्ञेयम्।

**मकारान्तः सर्वनामसंज्ञकः किम्-शब्दः।**

**६३ (पुंसि)**

| | | | |
|---|---|---|---|
| कः | कौ | के। | इत्यादि। |

अग्रे पुंलिङ्ग-यच्छब्दवत् ज्ञेयम्।

**६४ (स्त्रियाम्)**

| | | | |
|---|---|---|---|
| का | के | काः। | इत्यादि। |

स्त्रीलिङ्ग-यच्छब्दवत् ज्ञेयम्।



**६५ (नपुंसके)**

| | | | |
|---|---|---|---|
| किम् | के | कानि। | प्र०। द्वि०। |
| केन | काभ्याम् | कैः। | इत्यादि। अग्रे |

पुंवत् ज्ञेयम्।

**अकारान्तः सर्वनामसंज्ञकः सर्व-शब्दः।**

**६६ (पुंसि)**

| | | | |
|---|---|---|---|
| सर्वः | सर्वौ | सर्वे। | इत्यादि। |

अग्रे यच्छब्दवत् ज्ञेयम्।

**६७ (स्त्रियाम्)**

| | | | |
|---|---|---|---|
| सर्वा | सर्वे | सर्वाः। | इत्यादि। |

शेषं स्त्रीलिङ्ग-यच्छब्दवत् ज्ञेयम्।

**६८ (नपुंसके तु)**

| | | | |
|---|---|---|---|
| सर्वं | सर्वे | सर्वाणि। | प्र०। द्वि०। |
| सर्वेण | सर्वाभ्याम् | सर्वैः। | इत्यादि। शेषं |

पुंवज्ज्ञेयम्। सर्वशब्दवत्-विश्व-शब्दः। एक-शब्दश्च।

**६९ त्रिषु लिङ्गेषु समो युष्मद्-शब्दः।**

| | | | |
|---|---|---|---|
| त्वम् | युवाम् | यूयम्। | प्रथमा। |
| त्वाम्, त्वा | युवाम्, वाम् | युष्मान्, वः। | द्वितीया। |
| त्वया | युवाभ्याम् | युष्माभिः। | तृतीया। |
| तुभ्यम्, ते | युवाभ्याम्, वाम् | युष्मभ्यम्, वः। | चतुर्थी। |

| | | | |
|---|---|---|---|
| त्वत् | युवाभ्याम् | युष्मत् । | पञ्चमी । |
| तव, ते | युवयोः, वाम् | युष्माकम्,वः । | षष्ठी । |
| त्वयि | युवयोः | युष्मासु । | सप्तमी । |

## ७० त्रिषु लिङ्गेषु समः अस्मद्-शब्दः ।

| | | | |
|---|---|---|---|
| अहम् | आवाम् | वयम् । | प्रथमा । |
| माम्, मा | आवाम्, नौ | अस्मान्, नः । | द्वितीया । |
| मया | आवाभ्याम् | अस्माभिः । | तृतीया । |
| मह्यं, मे | आवाभ्यां, नौ | अस्मभ्यम्, नः । | चतुर्थी । |
| मत् | आवाभ्याम् | अस्मत् । | पञ्चमी । |
| मम, मे | आवयोः, नौ | अस्माकम्, नः । | षष्ठी । |
| मयि | आवयोः | अस्मासु । | सप्तमी । |

## मकारान्तः सर्वनामसंज्ञक इदम्-शब्दः ।

### ७१ ( पुंसि )

| | | | |
|---|---|---|---|
| अयम् | इमौ | इमे । | प्रथमा । |
| इमम्, एनम् | इमौ, एनौ | इमान्, एनान् । | द्वितीया । |
| अनेन, एनेन | आभ्याम् | एभिः । | तृतीया । |
| अस्मै | आभ्याम् | एभ्यः । | चतुर्थी । |
| अस्मात् | आभ्याम् | एभ्यः । | पञ्चमी । |
| अस्य | अनयोः,एनयोः | एषाम् । | षष्ठी । |
| अस्मिन् | अनयोः,एनयोः | एषु । | सप्तमी । |



### ७२ ( स्त्रियाम् )

| | | | |
|---|---|---|---|
| इयम् | इमे | इमाः । | प्रथमा । |
| इमाम् ,एनाम् | इमे, एने | इमाः,एनाः । | द्वितीया । |
| अनया,एनया | आभ्याम् | आभिः । | तृतीया । |
| अस्यै | आभ्याम् | आभ्यः । | चतुर्थी । |
| अस्याः | आभ्याम् | आभ्यः । | पञ्चमी । |
| अस्याः | अनयोः,एनयोः | आसाम् । | षष्ठी । |
| अस्याम् | अनयोः,एनयोः | आसु । | सप्तमी । |

### ७३ ( नपुंसके )

| | | | |
|---|---|---|---|
| इदम् | इमे | इमानि । | प्रथमा । |
| इदम्,एनत् | इमे,एने | इमानि,एनानि । | द्वि० । |

शेषं पुंवत् ।

## दकारान्तः सर्वनामसंज्ञक एतद्-शब्दः ।

### ७४ ( पुंसि )

| | | | |
|---|---|---|---|
| एषः | एतौ | एते । | प्रथमा । |
| एतम्, एनम् | एतौ, एनौ | एतान्,एनान् । | द्वितीया । |
| एतेन, एनेन | एताभ्याम् | एतैः । | तृतीया । |
| एतस्मै | एताभ्याम् | एतेभ्यः । | चतुर्थी । |
| एतस्मात् | एताभ्याम् | एतेभ्यः । | पञ्चमी । |
| एतस्य | एतयोः,एनयोः | एतेषाम् । | षष्ठी । |
| एतस्मिन् | एतयोः,एनयोः | एतेषु । | सप्तमी । |

७५ ( स्त्रियाम् )

| | | | |
|---|---|---|---|
| एषा | एते | एताः । | प्रथमा । |
| एताम्, एनाम् | एते, एने | एताः, एनाः । | द्वितीया । |
| एतया, एनया | एताभ्याम् | एताभिः । | तृतीया । |
| एतस्यै | एताभ्याम् | एताभ्यः । | चतुर्थी । |
| एतस्याः | एताभ्याम् | एताभ्यः । | पञ्चमी । |
| एतस्याः | एतयोः, एनयोः | एतासाम् । | षष्ठी । |
| एतस्याम् | एतयोः, एनयोः | एतासु । | सप्तमी । |

७६ ( नपुंसके )

| | | | |
|---|---|---|---|
| एतत् | एते | एतानि । | प्रथमा । |
| एतत्, एनत् | एते, एने | एतानि, एनानि । | द्वितीया |

शेषं पुंवत् ।

**सकारान्तः सर्वनामसंज्ञकः अदस्-शब्दः ।**

७७ ( पुंसि )

| | | | |
|---|---|---|---|
| असौ | अमू | अमी । | प्रथमा । |
| अमुम् | अमू | अमून् । | द्वितीया । |
| अमुना | अमूभ्याम् | अमीभिः । | तृतीया । |
| अमुष्मै | अमूभ्याम् | अमीभ्यः । | चतुर्थी । |
| अमुष्मात् | अमूभ्याम् | अमीभ्यः । | पञ्चमी । |
| अमुष्य | अमुयोः | अमीषाम् । | षष्ठी । |
| अमुष्मिन् | अमुयोः | अमीषु । | सप्तमी । |



७८ ( स्त्रियाम् )

| | | | |
|---|---|---|---|
| असौ | अमू | अमूः । | प्रथमा । |
| अमूम् | अमू | अमूः । | द्वितीया |
| अमुया | अमूभ्याम् | अमूभिः । | तृतीया । |
| अमुष्यै | अमूभ्याम् | अमूभ्यः । | चतुर्थी । |
| अमुष्याः | अमूभ्याम् | अमूभ्यः । | पञ्चमी । |
| अमुष्याः | अमुयोः | अमूषाम् । | षष्ठी । |
| अमुष्याम् | अमुयोः | अमूषु । | सप्तमी । |

७९ ( नपुंसके )

| | | | |
|---|---|---|---|
| अदः | अमू | अमूनि । | प्र० । द्वि० |
| अमुना | अमूभ्याम् | अमीभिः । | तृतीया । |

इत्यादि शेषं पुंवत् ।

**८० इकारान्तः सर्वनामसंज्ञको द्वि-शब्दः ( द्विवचने एव ) ।**

| पुंसि | नपुंसके | स्त्रियाम् | |
|---|---|---|---|
| द्वौ | द्वे | द्वे । | प्र० । द्वि० । |
| द्वाभ्याम् । | | | तृ० । च० । प० |
| द्वयोः । | | | ष० । स० । |

## ८१ त्रि-शब्दः (बहुवचने एव)।

| पुंसि | नपुंसके | स्त्रियाम् | |
|---|---|---|---|
| त्रयः | त्रीणि | तिस्रः। | प्रथमा। |
| त्रीन् | त्रीणि | तिस्रः। | द्वितीया। |
| त्रिभिः | | तिसृभिः। | तृतीया। |
| त्रिभ्यः | | तिसृभ्यः। | च०।प०। |
| त्रयाणाम्। | | तिसृणाम्। | षष्ठी। |
| त्रिषु | | तिसृषु। | सप्तमी। |

## ८२ चतुर्-शब्दः। (बहुवचने एव)

| पुंसि | नपुंसके | स्त्रियाम् | |
|---|---|---|---|
| चत्वारः | चत्वारि | चतस्रः। | प्रथमा। |
| चतुरः | चत्वारि | चतस्रः। | द्वितीया। |
| चतुर्भिः | | चतसृभिः। | तृतीया। |
| चतुर्भ्यः | | चतसृभ्यः। | च०।प०। |
| चतुर्णाम् | | चतसृणाम्। | षष्ठी। |
| चतुर्षु | | चतसृषु। | सप्तमी। |



## ८३ त्रिषु लिङ्गेषु समाः।

पञ्चन्—षष्—अष्टन् शब्दाः।

| | | | |
|---|---|---|---|
| पञ्च | षट् | अष्टौ, अष्ट। | प्र०।द्वि०। |
| पञ्चभिः | षड्भिः | अष्टाभिः, अष्टभिः। | तृतीया। |
| पञ्चभ्यः | षड्भ्यः | अष्टाभ्यः, अष्टभ्यः। | च०।प० |
| पञ्चानाम् | षण्णाम् | अष्टानाम्। | षष्ठी। |
| पञ्चसु | षट्सु | अष्टासु, अष्टसु। | सप्तमी। |

सप्तन्-नवन्-दशन् इत्यादयः पञ्चन्-शब्दवत् ज्ञेयाः।

**विंशति**—शब्दः स्त्रीलिङ्गो रुचिशब्दवत् ज्ञेयः (अस्य एकवचनमेव)।

एवं षष्टि—सप्तति—अशीति—नवति इत्यादयः।

**त्रिंशत्**—शब्दः स्त्रीलिङ्गः सरित्—शब्दवज्ज्ञेयः (अस्य एकवचनमेव)।

एवं चत्वारिंशत्-पञ्चाशत् इत्यादयः।

**शत**—सहस्र—अयुत—लक्ष—प्रयुत एते नपुंसका ज्ञान—शब्दवत् ज्ञेयाः। **कोटि**—शब्दः स्त्रियां रुचिवज्ज्ञेयः। अन्येषामपि बहूनां शब्दानां विभक्तयो रामचन्द्रिकारूपावल्यां द्रष्टव्याः॥

इति शब्दरूपावलिः समाप्ता।